हिरण्यकेश

पं० ४०

ञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते ॥ अस्ति भागीरथीतीरे पाटलिपुत्रनाम

धेयं नगरं तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा

केनापि पठ्यमानं श्लोकद्वयं शुश्राव । अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।

सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ यौवनं धनसम्पत्तिः प्रभुत्वमविवे
किता । एकैकमप्यनर्थाय किमु तत्र चतुष्टयम् ॥ इत्याकर्ण्यात्मनः पुत्राणामन
धिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्रानुष्ठा[२ नेनोद्विग्नमनाः स राजा चिन्त

घामाम कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः। काणेन चक्षुषा किं

वा चक्षुः पीडैव केवलम ॥ अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः। सकृद्दुः

खकरावाद्यावन्तिमस्तु पदे पदे। किञ्च। वरं गर्भस्रावो वरमपि च नैवाभिगम

हि॰ ने वरं जातः प्रेतो वरमपि च कन्यावजनिता । वरं बन्ध्या भार्य्या वरमपि च गर्भेषु
प॰ ५ वसतिः न चाऽविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः ॥ स जातो येन जातेन या
5 ति वंशः समुन्नतिम् । परिवर्तिनि संसारे मृतः को वा न जायते ॥ अन्यच्च ।

गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य । तेनाम्बा यदि सुतिनी
वद बन्ध्या कीदृशी भवति ॥ अपि च । दाने तपसि शौर्ये च यस्य न प्रथितं य
शः । विद्यायामर्थलाभे च मातुरुच्चार (२) एव सः ॥ अपरञ्च । वरमेको गुणी

हि प ८

पुत्रो न च मूर्खशतैरपि । एकश्चन्द्रस्तमो हन्ति न च ताराशतैरपि ॥ पुण्यतीर्थे कृ-
तं येन तपः क्वाप्यतिदुष्करम् । तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः ॥
6 तथा चोक्तम् । अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च । वश्यश्च

पुत्रोऽर्थकरी च विद्या षड् जीवलोकेषु सुखानि राजन्॥ कोऽधन्यो बहुभिः पुत्रैः
कुशूलापूरणाढकैः वरमेकः कुलालम्बी यत्र विश्रूयते पिता॥ इदानीमेते मम
पुत्रा गुणवन्तः क्रियन्ताम्। यतः। आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभि

हि प १ 7

नराणाम् । धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥
यतः । धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते । अजागलस्तनस्येव तस्य
जन्म निरर्थकम् ॥ यच्चोच्यते । आयुः कर्म च वित्तञ्च विद्या निधनमेव च ।

यद्वैतान्यपि सृज्यन्ते गर्भस्यस्यैव देहिनः ॥ किञ्च । अवश्यम्भाविनो भावा भवन्ति

महतामपि । नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ अन्यच्च । यदभावि न त

द्भावि भावि चेन्न तदन्यथा । इति चिन्ताविषघ्नोऽयमगदः [?] किन्न पीयते ॥

हि
प
८

पतन् कार्याह्वमाणं केषाञ्चिद्दालस्यवचनम् । यथा ह्येकेन चक्रेण न रथस्य ग
तिर्भवेत् एवं पुरुषकारेण विना दैवं न सिध्यति ॥ तथा च । पूर्वजन्मकृतं क-
र्म तद्दैवमिति कथ्यते । तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः ॥ अन्यच्च ।

4

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति । दैवं नि
हत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ यथा
मृत्पिण्डतः कर्ता कुरुते यद् यदिच्छति एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥

हि
प
९

9

अपरञ्च । काकतालीयवत् प्राप्तं दृष्ट्वापि निधिमग्रतः । न स्वयं दैवमादत्ते पुरु
षार्थमपेक्षते ॥ उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः । नहि सुप्तस्य सिं
हस्य प्रविशन्ति मुखे मृगाः ॥ तथाचोक्तम् । माता शत्रुः पिता वैरी येन बालो

न पाठितः न शोभते सभामध्ये हंसमध्ये बको यथा ॥ रूपयौवनसम्पन्ना विशाल

कुलसम्भवाः । विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ अपरञ्च । पुस्तके

षु च नाधीतं गुरुसन्निधौ न शोभते सभामध्ये जारगर्भ इव स्त्रियाः ॥ एतच्चिन्तयि

नाधीतं ।

हि
प
१
10

त्वा स राजा पण्डितसभां कारितवान् । राजोवाच । भो भोः पण्डिताः । श्रूयतां मम
वचनम् अस्ति कश्चित् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यमुन्मार्गगामिनाम
नधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्मकारयितुं समर्थः ।

यतः । काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतीः । तथा सत्सन्निधानेन मूर्खो या
ति प्रवीणताम् ॥ उक्तञ्च । हीयते हि मतिस्तात । हीनैः सह समागमात् । समै
श्च समतामेति विशिष्टैश्च विशिष्टताम् ॥ अत्रान्तरे विष्णुशर्मनामा पण्डितः सकल

हि
प
११

नीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत् देव । महाकुलसम्भूता एते राजपुत्राः
तन्मया नीतिं ग्राहयितुं शक्यन्ते । यतः । नाद्रव्ये निहिता काचित् क्रिया
फलवती भवेत् । न व्यापारशतेनापि शुकवत् पाठ्यते बकः ॥ अन्यच्च ।

अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते । आकरे पद्मरागाणां जन्म काचमणेः

कुतः ॥ अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान् नीतिशास्त्राभिज्ञान् करिष्यामि ।

राजा सविनयं पुनरुवाच कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः । अश्मापि

हि
प
१२

याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ अन्यच्च । यथोदयगिरेर्द्रव्यं सन्निकर्षेण दीप्य
ते । तथा सत्सन्निधानेन हीनवर्णोऽपि दीप्यते ॥ तदेतेषामस्मत्पुत्राणां नी-
तिशास्त्रोपदेशाय भवन्तः प्रमाणम् इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरःस

रे पुत्रान् समर्पितवान् । अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात्
प्रस्तावक्रमेण स पण्डितोऽब्रवीत् । काव्यशास्त्रविनोदेन कालो गच्छति धीमता
म् । व्यसनेन [२] च मूर्खाणां निद्रया कलहेन वा ॥ तद्भवतां विनोदाय काककूर्म

हि दीनां विचित्रां कथां कथयामि । राजपुत्रैरुक्तं कथ्यताम् । विष्णुशर्मोवाच । यू
प यं शृणुत सम्प्रति मित्रलाभः प्रस्तूयते । यस्यायमाद्यः श्लोकः — असाधना
१३ 13 [२] वित्तहीना बुद्धिमन्तः सुहृत्तमाः । साधयन्त्याशु कार्याणि काककूर्ममृगाः

वः

खगाः ॥ राजपुत्रा ऊचुः कथमेतत् सोऽब्रवीत् अस्ति गोदावरीतीरे विशालः ।

शाल्मलीतरुः तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचित्

वसन्नायां रात्रौ अस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि ल

हि प १५ 14

घुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमटन्तं व्याधमपश्यत् तमवलोक्याचिन्तयत् अद्य प्रातरेवानिष्टदर्शनं जातं न जाने किमनभिमतं दर्शयिष्यति । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । यतः ।

शोकस्थानं सहस्राणि भयस्थानं शतानि च । दिवसे दिवसे मूढमाविशन्ति
न पण्डितम् ॥ अन्यच्च । विषयिणामिदमवश्यं कर्तव्यम् । उत्पाद्योत्पाद्य बोद्धव्यं
महद्भयमुपस्थितम् । मरणव्याधिशोकानां किमद्य निपतिष्यति ॥ अथ तेन

हि प १५ 15

व्याधेन तण्डुलकणान् विकीर्य्य जालं विस्तीर्णम् । तत्र स च प्रच्छन्नो भूत्वा स्थितः ।
अस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डु
लकणानवलोकयामास ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्या

ह कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः। तन्निरूप्यतां तावत् भद्रमिदं
न पश्यामि प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम्।
कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे। वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो

हि यथा ॥ कपोता ऊचुः कथमेतत् । सोऽब्रवीत् अहमेकदा दक्षिणारण्ये चरन्नप

प श्यम् एको वृद्धो व्याघ्रः स्नातः सरस्तीरे ब्रूते भो भोः पान्थाः । इदं सुवर्णकङ्क-

१८ 16 णं कस्मात् गृह्यताम् ततो लोभाकृष्टेन केनचित् पान्थे नालोचितं भाग्येनै

तत् सम्भवति किन्त्वस्मिन्नात्मसन्देहे प्रवृत्तिर्न विधेया । यतः । अनिष्टादिष्ट
लाभेऽपि न गतिर्ज्ञायते शुभा । यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥
किन्तु सर्वत्रार्थार्जने प्रवृत्तौ सन्देह एव । तथा चोक्तम् । न संशयमनारुह्य

हि प ७

नरो भद्राणि पश्यति । संशयं पुनरारुह्य यदि जीवति पश्यति ॥ तन्निरूपया
मि तावत् । प्रकाशं ब्रूते कुत्र तव कङ्कणम् । व्याघ्रो हस्ते प्रसार्य्य दर्शयति ।
पान्थोऽवदत् कथं मारात्मके त्वयि विश्वासः । व्याघ्र उवाच शृणु रे पान्थ ।

17

प्रागेव यौवनदशायामतिदुर्वृत्तोऽस्मि अनेकगोमानुषाणां वधात्तो शूद्रा मता दा

राश्चवंशहीनश्चाहम् ततः केनचिद्धार्मिकेनाहमादिष्टः दानधर्मादिकञ्चरन्त भवा

न् तदुपदेशादिदानीमहं स्नानशीलोदाता वृद्धो गलितनखदन्तो न कथं विश्वास

हि
प
१८
18

भूमिः । यतः । इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा अलोभ इति मार्गोऽ
यं धर्मस्याष्टविधः स्मृतः ॥ तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते । उत्तर
स्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ ममैवैतावान् लोभविरहो येन स्वहस्तस्थ

मपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । तथापि व्याघ्रो मानुषं खा-

दतीति लोकापवादो दुर्निवारः । यतः गतानुगतिको लोकः कुट्टिनीमुपदे-

शिनीम् । प्रमाणयति नो धर्मे यथा [२] गोघ्नमपि द्विजम् ॥ मया च धर्मशास्त्रा-

हि
प
१९

एषधीनानि शृणु — प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा। आत्मौ
पम्येन भूतानां दयां कुर्वन्ति साधवः॥ अपरञ्च। प्रत्याख्याने च दाने च
सुखदुःखे प्रियाप्रिये। आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति॥ अन्यच्च।

मातृवत् परदारेषु परद्रव्ये च लोष्टवत् । आत्मवत् सर्वभूतेषु यः पश्यति स

ण्डितः ॥ त्वञ्चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम् । तथाचोक्तम् ।

दरिद्रान् भर कौन्तेय । मा प्रयच्छेश्वरे धनम् । व्याधितस्यौषधं पथ्यं नीरुजस्य

किमौषधैः ॥ अन्यच्च । दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च
पात्रे च तद्दानं सात्त्विकं विदुः ॥ ततश्च सरसि स्नात्वा सुवर्णकङ्कणं गृहाण ततो
यावदसौ तद्वचः प्रतीतो लोभात् सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः

पलायितमहमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् अहह महापङ्के पतितोऽ

सि। अतस्त्वामहमुत्थापयामि इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स

पन्थोऽचिन्तयत्। न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः

हि
प
२१

स्वभाव एवात्र नथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥ किञ्च । स्ववशे-

न्द्रियविज्ञानां हस्तिस्नानमिव क्रिया । दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां [१]

विना ॥ नम्रया भद्रं न कृते यदत्र मारात्मके [२] विश्वासः कृतः । तथा चोक्तम् ।

शृङ्गिणाञ्च नदीनाञ्च नखिनां शस्त्रपाणिनाम् [३]। विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ अपरञ्च। सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः। अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ॥ अन्यच्च। स हि गगनविहारी कल्मष-

हि ध्वंसकारी। दशशतकरधारी [४] ज्योतिषां मध्यचारी। विधुरपि विधियोगात् ग्र

प स्यते राहुणासौ लिखितमपि ललाटे प्रोज्झितुं कः समर्थः। इति चिन्तयन्नेवा

२२ सौ व्याघ्रेण व्यापादितः खादितश्च। अतोऽहं ब्रवीमि कङ्कणस्य न लोभेन इत्या

22

दि । अतः सर्वथाऽविचारितं कर्म न कर्तव्यमिति । यतः । सुजीर्णमन्नं सुवि

चक्षणः सुतः सुशासिता (१) स्त्री नृपतिः सुसेवितः । सुचिन्त्य चोक्तं सुविचार्य

यत् कृतं सुदीर्घकालेऽपि न याति विक्रियाम् ॥ एतद्वचनं श्रुत्वा कश्चित् कपो

नः सदर्पमाह आः किमेवमुच्यते । वृद्धस्य (क) वचनं ग्राह्यमापत्काले ह्युप
स्थिते । सर्वैश्चैवं विचारे न भोजनेऽपि प्रवर्त्तते (२) (ख) ॥ यतः । शङ्काभिः सर्व
माक्रान्तमन्नं पानञ्च (३) भूतले । प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा ॥

तथा चोक्तम् । ईर्षी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः । परभाग्योपजीवी च

षडेते दुःखभागिनः ॥ एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः । यतः । सुमहा-

न्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः । छेत्तारः संशयानाञ्च क्लिश्यन्ते लोभमो-

हि हिताः ॥ अन्यच्च । लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते । लोभान्मोहश्च

प नाशश्च लोभः पापस्य कारणम् (क) ॥ अनन्तरं ते सर्वे जालनिबद्धा बभूवुः ततो

२४ यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति ऽयतः । न गणस्याग्रतो ग

क्येन सिद्धे कार्ये समं फलम्। यदि कार्यविपत्तिः २ स्यात् मुखरस्तत्र हन्यते॥
तथा चोक्तम्। आपदां कथितः पन्था इन्द्रियाणामसंयमः। तज्जयः सम्पदां मार्गो
येनेष्टं तेन १ गम्यताम्॥ तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच नायमस्य दोषः।

हि यतः। आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्। मातृजङ्घा हि वत्सस्य स्तम्भीभ-

प वति बन्धने [२] ॥ अन्यच्च। स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः। न तु भीतपरि-

२५ त्राणे [२] वस्तूपालम्भपण्डितः॥ विपत्काले विस्मय एव कापुरुषलक्षणं तदत्र

२५

धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् । यतः । विपदि धैर्यमथाभ्युदये क्षमा सद-
सि वाक्पटुता युधि विक्रमः । यशसि चाभिरुचिर्व्यसनं [ष] श्रुतौ प्रकृतिसिद्धमि-
दं हि महात्मनाम् ॥ सम्पदि यस्य न हर्षो विपदि विषादो न रणे च धीरत्वम् ।

हि
प
२८
26

त्वं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ अन्यच्च । षड्दोषाः पुरुषेणे

ह हातव्या भूतिमिच्छता । निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ इदानीम

पि एवं सर्वैरेकचित्तीभूय जालमादाय उड्डीयताम् । यतः । अल्पानामपि वस्तूनां

संहतिः (१) कार्यसाधिका । तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ संहतिः
श्रेयसी पुंसां स्वकुलैरल्पकैरपि । तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥
इति विचिन्त्य पक्षिणः सर्वे जालमादाय उत्पतिताः । अनन्तरं स व्याधः सुदूरा

हि जालापहारकांस्तानवलोक्य पश्चाद्धावितोःचिन्तयत् । संहतास्तु हरन्तीमे (क)

प जालं मम विहङ्गमाः । यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥ ततस्तेषु ।

२७ 27 चक्षुर्विषयमतिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः । अथ लुब्धकं निवृत्तं दृष्ट्वा

कपोता ऊचुः (ख) किमिदानीं कर्तव्यमुचितम्। चित्रग्रीव उवाच। माता मित्रं पिता

चेति स्वभावात्त्रितयं हितम्। कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः॥ तन्मे मि

त्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति (क) सोऽस्माकं।

हि
प
२८

पाशंछेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च सर्वदा
पायशङ्कया शतद्वारं विवरं कृत्वा निवसति (ख) ततो हिरण्यकः कपोतावपातभ-
याच्चकितस्तूष्णीं स्थितः । चित्रग्रीव उवाच सखे हिरण्यक कथमस्मान्न सम्भाष-

से। ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय [१] ससम्भ्रमं बहिर्निःसृत्याब्रवीत् आः पु-
ण्यवानस्मि प्रियसुहृन्मे चित्रग्रीवः समागतः। यस्य मित्रेण सम्भाषो यस्य मित्रेण सं-
स्थितिः [२]। यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥ अथ पाशबद्धांश्चैतान्

हि दृष्ट्वा सविस्मयः क्षणं स्थित्वा उवाच सखे किमेतत् । चित्रग्रीव उवाच । सखेऽस्माकं

प प्राक्तनजन्मकर्मणः फलमेतत् । यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र

२५ च शुभाशुभमात्मकर्म कृतम् । तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च

29

विपाकवशादुपैति। रोगशोकपरीताप बन्धनव्यसनानि च ॥१४॥ आत्मापराधवृक्षस्य फलान्येतानि देहिनाम् ॥ एतच्छ्रुत्वा मूषिकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमु पसर्पति। चित्रग्रीव उवाच। मित्र। मैवं प्रथममस्मदाश्रितानामेतेषां तावत् पा

हि

प

३

30

शोऽस्ति यदि तदा मम पाशं पश्चाच्छेत्स्यसि । हिरण्यकोऽप्याह अहमल्पशक्तिर्दन्ता-
श्च मे कोमलास्तदेतेषां पाशांश्छेत्तुं कथमहं समर्थो भवामि । तत् यावन्मे दन्ता न
त्रुट्यन्ति तावत्तव पाशं छिनद्मि । तदनन्तरमप्येषां बन्धनं यावच्छक्यं छेत्स्यामि ।

चित्रग्रीव उवाच । अस्त्वेवं तथापि यथाशक्ति बन्धनमेतेषांत्वमपनय । हिरण्यकेन

उक्तं आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम् । यतः ।

आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि । आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ अन्यच्च ।

हि प ३१ धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः । तान्निघ्नता किन्न हतं । रक्षता किन्न र-
क्षितम् ॥ चित्रग्रीव उवाच । सखे । नीतिस्तावदीदृश्येव किंत्वहमस्म दाश्रितानां दुः-
31 खं सोढुं सर्वथाऽसमर्थस्तेनेदं ब्रवीमि । यतः । धनानि जीवितञ्चैव परार्थे प्राज्ञ उ

न त्यजेत्। सन्निमित्ते वरं त्यागो [?] विनाशे नियते सति ॥ अथ मम परस्यासाधारणे
हेतुः – जातिद्रव्यबलानां च साम्यमेषां मया सह। मत्प्रभुत्वफलं ब्रूहि कदा किन्त
द्भविष्यति ॥ अन्यच्च। विना वर्तनमेवैते न त्यजन्ति ममान्तिकम्। तन्मे प्राण॰

हि व्ययेनापि जीवयेनात्ममाश्रितान् ॥ किञ्च । मांसमूत्रपुरीषास्थिनिर्मिते च कले
प वरे । विनश्वरे विहायास्थां यशः पालय मित्र । मे ॥ अपरञ्च पश्य । यदि नित्यम-
२२ 32 नित्येन निर्मलं मलवाहिना [२] । यशः कायेन लभ्येन तन्न लब्धं भवेन्नु किम् ॥

यतः । शरीरस्य गुणानान्तु दूरमत्यन्तमन्तरम् [८] । शरीरं क्षणविध्वंसि कल्पान्त

स्थायिनो गुणाः ॥ इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत् । सा

धु मित्र । साधु अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते एव मुक्ता

हि
प
३२
33

तेन सर्वेषां बन्धनानि छिन्नानि। ततो हिरण्यकः सर्वान् सादरं सम्पूज्याह। सखे
चित्रग्रीव। सर्वथा अत्र जालबन्धनविधौ सति दोषमाशङ्क्य आत्मन्यवज्ञा न कर्त्त
व्या। यतः। योऽधिकाद् योजनशतात् पश्यतीहामिषं खगः। स एव प्राप्तका

स्तत्र पाशाबन्धं न पश्यति [२] ॥ अपरञ्च । शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्ग-

मयोरपि बन्धनम् । मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥

अन्यच्च । व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदम् । बध्यन्ते निपुणैर

हि गाधसलिलान्मत्स्याः समुद्रादपि । इमीतं किमिहास्ति किं सुचरितं कः स्यानला
प मे गुणः कालो हि ग्रसन [ ] प्रसारितकरो गृह्णाति दूरादपि ॥ इति प्रबोध्यातिथ्यं
२४ कृत्वालिङ्ग्य च संप्रेषितश्चित्रग्रीवोऽपि सपरिवारो यथेष्टदेशान् ययौ हिरण्यकोऽपि
34

स्वविवरं प्रविष्टः । यानि कानि च मित्राणि कर्तव्यानि शतानि च । पश्य मूषिकमि

त्रेण कपोता मुक्तबन्धनाः ॥ अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी सा

श्चर्यमिदमाह अहो हिरण्यक । श्लाघ्योऽसि अतोऽहमपि त्वया सह मैत्रीमिच्छामि

हि अतो मां मैत्रेणानुग्रहीतुमर्हसि। एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह कस्त्वं
प स ब्रूते लघुपतनकनामा वायसोऽहम्। हिरण्यको विहस्य आह का त्वया सह
२५
35 मैत्री। यतः। यद् येन युज्यते लोके बुधस्तत्तेन योजयेत्। अहमन्नं भवान् भोक्ता

कथं प्रीतिर्भविष्यति ॥ अपरञ्च । भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम् । शृगा
लात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥ वायसोऽब्रवीत् कथमेतत् हिरण्यकः
कथयति । अस्ति मगधदेशे चम्पकावती नामारण्यानी तस्यां चिरान्महता स्नेहेन

हि मृगकाकौ निवसतः स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित् शृगाले

प नावलोकितः तं दृष्ट्वा शृगालोऽचिन्तयत् आः कथमेतन्मांसं सुललितं भक्षयामि।

२९ भवतु विश्वासं तावदुत्पादयामि। इत्यालोच्योपसृत्याब्रवीत् मित्र। कुशलं ते।

36

मृगेण उक्तं कस्त्वम् जम्बुको ब्रूते क्षुद्रबुद्धिनामा जम्बुकोऽहम् अत्रारण्ये बन्धु-
हीनो मृतवन्निवसामि इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽ
स्मि अधुना तवानुचरेण मया सर्वथा भवितव्यमिति । मृगेणोक्तम् एवमस्तु ।

हि प ३१

ततस्तावदस्तंगते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । त
त्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा का
कोऽवदत् सखे । कोऽयं द्वितीयः । मृगो ब्रूते जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः ।

37

काको ब्रूते मित्र । अकस्मादागन्तुना सह मैत्री न युक्ता । तत्र भद्रमाचरितम् ।
तथा चोक्तम् । अज्ञातकुलशीलस्य वासो देयो न कस्यचित् । मार्जारस्य हि दोषेण
हतो गृध्रो जरद्गवः ॥ तावाहतुः कथमेतत् । काकः कथयति । अस्ति भागीरथीती

हि
प
१८

38

रे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः [१] तस्यकोटरे दैवदुर्विपाका [२] द्ग।
लितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति अथ कृपया तज्जीवनाय तद्वृक्ष
वासिनः पक्षिणः स्वाहारात किञ्चिदुद्धृत्य ददति तेनासौ जीवति।(क) अथ क

तावद्दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः । ततस्तमाया
न्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः तच्छ्रुत्वा जरद्गवेनोक्तं कोऽयमा
याति दीर्घकर्णो गृध्रमवलोक्य सभयमाह — हा । हतोऽस्मि । यतः । ताव

हि द्भयस्य [३] भेतव्यं यावद्भयमनागतम् । आगतन्तु भयं वीक्ष्य नरः कुर्य्याद् यथो
प चितम् ॥ ततोऽधुनातिसन्निधानेन पलायितुमशक्यम् । तद् यथा भवितव्यं त
३५
39 द्भवतु तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोच्य तमुपसृत्याब्रवी

त् ग्राध्य। तामभिवन्द्य। गृध्रोऽवदत् कस्त्वम् सोऽवदत् मार्जारोऽहम्। गृध्रो ब्रूते दूरमपसर नो चेद्धन्तव्योऽसि मया। मार्जारोऽवदत् श्रूयतां तावदस्मद्वचनं ततो य

द्यहं वध्यस्तदा हन्तव्यः। यतः। जातिमात्रेण किं कश्चिद्वध्यते पूज्यते क्वचित्। व्य

हि
प
५ 40

वहारं परिज्ञाय बध्यः पूज्योऽथ वा भवेत् ॥ गृध्रो ब्रूते ब्रूहि किमर्थमागतोऽसि सोऽव
दत् अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायण व्रतमाचरं
स्तिष्ठामि युष्माकं धर्मज्ञानां प्रेमविश्वासभूमयः पक्षिणः सर्वदा ममाग्रे त्वदीयगुणग्रा

मं प्रत्नुवन्ति श्रुतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः भवन्तश्चैतादृशा
धर्मज्ञाः यन्मामतिथिं हन्तुमुद्यताः गृहस्थधर्मश्चैषः — अरावप्युचितं कार्यमाति
थ्यं गृहमागते । छेत्तुः [ ] पार्श्वगतां छायां नोपसंहरति द्रुमः ॥ यद्यन्नं नास्ति तदा

हि
प
५८

सूनृतेनापि वचसा तावदतिथिः पूज्यः। तथा चोक्तम्। तृणानि भूमिरुदकं वा-
क् चतुर्थी च सूनृता। एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन॥ अपरञ्च। निर्गु-
णेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः। न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि॥

अन्यच्च। बालो वा यदि वा वृद्धो युवा वा गृहमागतः। तस्य पूजा विधातव्या सर्वस्या

भ्यागतो गुरुः (क) ॥ अन्यच्च। अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते। स तस्मै दु

ष्कृते [ ] दत्ता पुण्यमादाय गच्छति ॥ अन्यच्च। उत्तमस्यापि वर्णस्य नीचोऽपि गृहमाग

हि
प
५२

ता । पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ गृध्रोऽवदत् मार्जारो हि मांसरुचिः

पक्षिशावकाश्चात्रनिवसन्ति तेनैवं ब्रवीमि । तत् श्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ ।

42 स्पृशति कृष्ण कृष्ण [२] ब्रूते च मया धर्मशास्त्रं श्रुत्वा वीतरागेण इदं दुष्करं व्रतं चा

न्द्रायणमध्यवसितम् । यतः । परस्परं विवदमानानामपि धर्मशास्त्राणाम् [२] अ-
हिंसा परमो धर्म इत्यत्रैकमत्यम् । यतः । सर्वहिंसानिवृत्ता ये नराः सर्वं सहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ अन्यच्च । एकएव सुहृद्धर्मो निधनेऽप्य-

हि

प

८२

न याति यः । शरीरेण समं नाशे सर्वमन्यत्तु गच्छति ॥ किञ्च । योऽत्ति यस्य यदा

मांसमुभयोः पश्यतान्तरम् । एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥ अपि च ।

43 मर्त्तव्यमिति यद्दुःखं पुरुषस्योपजायते । शक्यस्तेनानुमानेन [१] परोऽपि परिरक्षि-

तम् ॥ शृणु भ्रातः । स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते । अस्य दग्धोदरस्यार्थे

कः कुर्यात् पातकं महत् ॥ एवं विश्वास्य स मार्जारः तरुकोटरे स्थितः ततो दि

नेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति अथ येषामप

हि
प
८८
44

न्यानि खादितानि तैः शोकार्त्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा तत परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरञ्च । तेनैव जरद्गवेनास्माकं ।

श्रावकाः खादिता इति सर्वैः पक्षिभिर्निश्चित्य मिलित्वा गृध्रो व्यापादितः। अतो

ऽहं ब्रवीमि अज्ञातकुलशीलस्येत्यादि। इत्याकर्ण्य स जम्बुकः सकोपमाह मृग

स्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत्। तत् कथं भवता सह एत

हि
प
८५
45

स स्नेहान्नहन्निरुत्तरोत्तरं वर्द्धते । यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ अन्यच्च । अयं निजः परो वेति गणना
लघुचेतसाम् । उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥ यथायं मृगो मम बन्धु

स्तथा भवानपि । मृगोऽब्रवीत् किमनेनोत्तरेण सर्वैरेकत्र विश्रम्भालापैः सुखम
नुभवद्भिः स्थीयताम् । यतः । न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ काकेनोक्तमेवमस्तु । अथ प्रातः सर्वे

हि यथाभिमतदेशं गताः एकदा निभृतं शृगालो ब्रूते । सखे । मृग । एतस्मिन्नेव वनै

प कदेशे शस्यपूर्णक्षेत्रमस्ति तदहं त्वां तत्र नीत्वा दर्शयामि तथाकृते सति मृगः

५९ प्रत्यहं तत्र गत्वा शस्यं खादति ततो दिनकतिपयेन क्षेत्रपतिना ते दृष्ट्वा पाशो यो

46

जितः । अनन्तरं उपवनमागतो मृगस्तत्र चरन् पाशैर्बद्धोऽचिन्तयत् को मामितः का-
लपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः अत्रान्तरे जम्बुकस्तत्रागत्य उप-
स्थितोऽचिन्तयत् फलितस्तावदस्माकं कपटप्रबन्धो मनोरथसिद्धिरपि बाहुल्यान्मे

हि
प
८०
47

भविष्यति । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तानि अस्थीनि मयावश्यं प्राप्तव्या-
नि । स च मृगस्तं दृष्ट्वोल्लासितो ब्रूते सखे । छिन्धि तावन्मम बन्धनं सत्वरं त्रा-
यस्व माम् । यतः । आपत्सु मित्रं जानीयात् युद्धे शूरमृणे शुचिम् । भार्यां क्षीणे

षु विघ्नेषु व्यसनेषु च बान्धवान् ॥ अपरञ्च । उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ जम्बुकः पाशं मुहुर्मुहुर्विलोक्याऽ
चिन्तयत् दृढबन्धनबद्धोऽस्ति तावदयं मृगः चूते च सावे । स्नायुनिर्मितपा

हि प ५८ 58

शांस्तदद्यभट्टारकवारे कथमेतान् दन्तैः स्पृशामि मित्र। यदि चित्ते नान्यथा
मन्यसे तदा प्रभाते यत्त्वया वक्तव्यं तत् कर्तव्यमिति। अनन्तरं स काकः प्रदोष-
काले मृगमनागतमवलोक्य इतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वोवाच सखे। किमे

तत् श्रृगेणोक्तं श्रवधीरितसुहृद्वाक्यस्य फलमेतत् । तथाचोक्तम् । सुहृदां हि-

तकामानां यः शृणोति न भाषितम् । विपत् सन्निहिता तस्य स नरः शत्रुनन्द-

नः [९] ॥ काको ब्रूते स वञ्चकः क्वास्ते श्रृगेणोक्तं मन्मांसार्थीतिष्ठत्यत्रैव ।

हि काको ब्रूते उक्तमेव मया पूर्वम्। अपराधो न मेऽस्तीति नैतद्विश्वासकारणम्।
प विद्यते हि नृशंसेभ्यो भयं गुणवतामपि॥ दीपनिर्वाणगन्धञ्च सुहृद्वाक्यमरुन्ध-
५९
तीम्। नजिघ्रन्ति न शृण्वन्ति नपश्यन्ति गतायुषः [२]॥ परोक्षे कार्यहन्तारं प्र

त्यक्षे प्रियवादिनम् । वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् [३] ॥ ततः काको दीर्घं निश्वस्य अरे वञ्चक । किं त्वया पापकर्मणा कृतम् । यतः । संलापितानां मधुरैर्वचोभिर्मिथ्योपचारै [१] श्च वशीकृतानाम् । आशावतां श्रद्दधतां च लोके ।

हि प ५. 50

किमर्थिनां वञ्चयितव्यमस्ति ॥ अन्यच्च । उपकारिणि विश्रब्धे शुद्धमतौ यः समाच
रति पापम् । तं जनमसत्यसन्धं भगवति । वसुधे । कथं वहसि ॥ दुर्जनेन समं
सख्यं प्रीतिञ्चापि न कारयेत् । उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥

अथवा स्थितिरियं दुर्जनानाम् । प्राक् पादयोः पतति खादति पृष्ठमांसम् कर्णे
कलं किमपि रौति शनैर्विचित्रम् । छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः सर्वं ख
लस्य चरितं मशकः करोति ॥ दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् । मधु

हि
प
५१
51

तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥ अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्त-
त्प्रदेशं गच्छन् काकेना वलोकितः । तमालोक्य काकेनोक्तम् । सखे । मृग ।
त्वमात्मानं मृतवत् [२] संदर्श्य वातेनोदरं पूरयित्वा पादांस्तब्धीकृत्य तिष्ठ अ

हे तव चक्षुषी चञ्चुना लिखामि । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पला
यिष्यसे मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचने
न तथाविधो मृग आलोकितः आः स्वयं मृतोसि । इत्युक्त्वा मृगं बन्धनान्मोचयि

हि
प
५२

52

त्वा पाशात् संवरीतं कृतयत्नो बभूव । ततः कियद्दूरेऽन्तरिते क्षेत्रपतौ स मृगः का

कशब्दं श्रुत्वा ससम्भ्रममुत्थाय पलायितः तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात् क्षि

प्तेन लगुडेन शृगालो व्यापादितः । तथा चोक्तम् । त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः प

क्षैस्त्रिभिर्दिनैः । अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ अतोऽहं ब्रवीमि भक्ष्यभ-
क्षकयोः प्रीतिरित्यादि । काकः पुनराह । भक्षितेनापि भवता नाहारो मम पुष्क-
लः । त्वयि जीवति जीवामि चित्रग्रीव इवानघः ॥ (क) अन्यच्च । तिरश्चामपि वि-

हि
प
५२

ख्यातो दृष्टः शोपककर्म्मणाम् । सतो हि साधुशीलत्वात् स्वभावो न निवर्त्तते ॥ सा

धोः प्रकोपितस्यापि मनो नायाति विक्रियाम् । नहि तापयितुं शक्यं सागराम्भस्तृ

53 णोल्कया ॥ हिरण्यको ब्रूते चपलस्त्वं चपलेन सह स्नेहः सर्वथा न कर्त्तव्यः ।

तथा चोक्तम् । किञ्च । मार्जारो महिषो मेषः काकः कापुरुषस्तथा । विश्वासात्
प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ किञ्चान्यत् शत्रुपक्षो भवानस्माकम् । उक्तं
चैतत् शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ॥ । सुतप्तमपि पानीयं

शमयत्येव पावकम् ॥ दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् । मणिना भू
षितः सर्पः किमसौ न भयङ्करः ॥ यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ॥ अपरञ्च । महताप्यर्थसारेण यो

विश्वसिति शत्रुश्च । भार्य्यास्तु च विरक्तास्तु तदन्तं तस्यजीवनम् ॥ लघुपतनको
क्ते श्रुतं मया सर्वं तथापि ममैतावानेव सङ्कल्पः यत्त्वया सह सौहृद्यमव
श्यं करणीयमितिः नो चेदनाहारेणात्मानं तव द्वारि व्यापादयिष्यामि । तथा हि

हि प ५५ 55

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च [१] दुर्जनो भवति । सुजनस्तु कनकघटवत् दु
र्भेद्यश्चाशु सन्धेयः ॥ किञ्च । द्रवत्वात् सर्वलोहानां [२] निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां सङ्गतं दर्शनात् सताम् ॥ किञ्च । नारिकेलसमाकारा

दृश्यन्तेऽपि हि सज्जनाः [३]। अन्ये बदरिकाकारा बहिरेव मनोहराः ॥ अन्यच्च।

ते हृच्छेदेऽपि साधूनां गुणा नायान्ति विक्रियाम् ॥ भङ्गेनापि मृणालानामनु

बध्नन्ति तन्तवः ॥ अन्यच्च। शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः।

हि
प
५९
56

दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ एतैर्गुणैरुपेतो भवदन्यो मया कः
सुहृत् प्राप्तव्यः । – इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह आप्या-
यितोऽहं भवतामेनेन वचनामृतेन । तथा चोक्तम् । घर्मार्तं न तथा सुशीत

ल जलैः स्नानं न मुक्तावली न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।

प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः सद्युक्त्यान परिष्कृतं सुकृतिना

माकृष्टिमन्त्रोपमम् ८ ॥ अन्यच्च । रहस्यभेदो याञ्चा च नैष्ठुर्यं चलचित्तता ।

हि
प
५७
57

क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते । यतः । पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते । अस्तब्धत्वम चापल्यं प्रत्यक्षेणावगम्यते ॥ अपरञ्च । अन्यथैव हि सौहार्दं भवेत् स्वच्छान्तरात्म

नः। प्रवर्ततेऽन्यथा वाणी शाठ्योपहतचेतसः [२]॥ मनस्यन्यद् वचस्यन्यत् कार्ये

मन्यद् दुरात्मनाम्। मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्॥ तद्भवन्तु भ

तोऽभिमतमेव रक्तका हिरण्यको मैत्रं विधाय भोजनविशेषैर्वायसं सन्तोष्य वि

हि
प
५८
58

वरे प्रविष्टः। वायसोऽपि स्वस्थानं गतः। ततः प्रभृति तयोरन्योऽन्याहारप्रदाने-
न कुशलप्रश्नैर्विस्रम्भालापैश्च कालोऽतिवर्तते। एकदा लघुपतनको हिरण्य
कमाह सखे। वायसस्यकष्टलभ्याहारमिदं तदेतत् स्थानं परित्यज्य स्थानान्तरं

गन्तुमिच्छामि । हिरण्यको ब्रूते । स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखाः

नराः । इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥ काको ब्रूते मित्र । काप

रुषस्य वचनमेतत् । यतः । स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।

हि

प

५९

59

नैते व नियतं यान्ति काकाः कापुरुषा मृगाः ॥ अन्यच्च । को वीरस्य मनस्विनः

स्वविषयः को वा विदेशः स्मृतः येदेशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।

यद्दंष्ट्रानखलाङ्गूलप्रहरणः सिंहो वनं गाहते तस्मिन्नेव हतद्विपेन्द्ररुधिरैः तृष्णां

क्लिन्नस्यात्मनः ॥ हिरण्यको ब्रूते मित्र । क्व गन्तव्यम् । चलत्येकेन पादेन तिष्ठत्ये

केन बुद्धिमान् । नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ वायसो ब्रूते । अस्ति

सुनिरूपितस्थानम् । हिरण्यकोऽवदत् किं तत् । वायसो ब्रूते । अस्ति दण्डकारण्ये

हि प ८.

कर्पूरगौराभिधाने सरस्तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्मः

सहजधार्मिकः प्रतिवसति । यतः । परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।

60 धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ स च भोजनविशेषैर्मां संवर्द्धयिष्यति

हिरण्यकोऽब्रवीत् तत् किमत्रावस्थाय मया कर्तव्यम् । यतः । यस्मिन् देशे न सम्मा
नो न वृत्तिर्नैव बान्धवाः । न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥ अपरञ्च ।
धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः । पञ्च यत्र न विद्यन्ते तत्र वासं न कार

हि
प
६१
61

येत् ॥ अपरञ्च । लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता । पञ्च यत्र न वि
द्यन्ते न कुर्यात् तत्र संस्थितिम् ॥ अन्यच्च । तत्र मित्रे । न वस्तव्यं यत्र नास्ति च
चतुष्टयम् । ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ ततो मामपि तत्र नय । अथ

वायसस्तेन मित्रेण सहविचित्रालापैः स्थित्वा तस्यसरसः समीपं ययौ ततो मन्थरोदू

रादेव लघुपतनकमवलोक्य उत्थाय यथोचितमातिथ्यं विधाय मूषकस्यातिथि

सत्कारं चकार। यतः। गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः। पतिरेको

हि० ६२

62

गुरुः स्त्रीणां सर्वत्राभ्यागतो गुरुः ॥ अपरञ्च । उत्तमस्यापि वर्णस्य नीचोऽपि गृहमा
गतः । पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ वायसोऽवदत् सखे मन्थर ।
सविशेषं पूजामस्मै विधेहि यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिर

एपकनामा मूषिकराजः एतस्य शताल्लातिं जिह्वासहस्रद्वयेनापि यदि सर्प राजः

कदाचित् कर्तुं समर्थः स्यादित्युक्त्वा चित्रग्रीवोपाख्याने वर्णितवान् । मन्थरः सादरं

हिरण्यकं संपृज्याह भद्र । आत्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि ।

हि
प
६२
63

हिरण्यकोऽवदत् कथयामि श्रूयताम्। अस्ति चम्पकाभिधानायां नगर्यां परिव्रा
जकावसथः। तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति। स च भोजनाव शि
ष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तके [ऽ] ऽवस्थाप्य स्वपिति अहञ्च तदन्नमुत्

स्तत्र प्रत्यहं भक्षयामि। अनन्तरं तस्य प्रियसुहृद्वीणाकर्णो नाम परिव्राजकः सम

यातः। तेनसह नानाकथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाक

र्णो भूमिमताडयत। तंतथाविधं दृष्ट्वा वीणाकर्ण उवाच सखे। किमिति मम क

हि
प
९८

थाविरक्तोऽन्यासक्तो भवान् । यतः । मुखं प्रसन्नं विमला च दृष्टिः कथानुरागो मधु-
राच वाणी । स्नेहोऽधिकं सम्भ्रमदर्शनञ्च सदानुरक्तस्य जनस्य लक्ष्म । अदृष्टिदानं
कृतपूर्वनाशनम् अमाननं दुश्चरितानुकीर्तनम् । कथाप्रसङ्गेन च नामविस्मृति

64

विरक्तभावस्य जनस्य [?] लक्षणम् ॥ चूडाकर्णेन उक्तं मित्र । नाहं विरक्तः किन्तु

पश्य मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति । वीणाक-

र्णो नागदन्तमवलोक्याह कथं मूषिकः स्वल्पबलोऽप्येतावद्दूरमुत्पतति । तदत्र

हि केनापि कारणेन भवितव्यम् । तथा चोक्तम् । अकस्मात् युवती वृद्धं केशेष्वाकृष्य
प
६५ चुम्बति । पतिं निर्दयमालिङ्ग्य हेतुरत्र भविष्यति । चूडाकर्णः पृच्छति कथमेतत् ।
65 वीणाकर्णः कथयति -- अस्ति गौडीये कौशाम्बी नाम नगरी । तस्यां चन्दनदा

ष्ठो नाम वणिग् महाधनो निवसति तेन च पश्चिमे वयसि वर्तमानेन कामाधिष्ठित

चेतसा धनदर्पाल्लीलावती नाम वणिक्पुत्री परिणीता सा च मकरकेतोर्वैजय-

न्तीव यौवनवती बभूव स च वृद्धपतिस्तस्याः सन्तोषाय नाभवत् । यतः । शशि

हि
प
८८
66

नीव हिमार्तानां घर्मार्तानां रवाविव । मनो न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ (क) ॥ अन्यच्च । पलितेष्वपि दृष्टेषु पुंसः (?) का नाम का गिता । भेषजमिव मन्य न्ते यदन्यमनसः स्त्रियः ॥ स च वृद्धपतिस्तस्यामतीवानुरागवान् । यतः । धना

षा जीविताशा च गुर्वी प्राणभृतां सदा । वृद्धस्य तरुणी भार्या प्राणेभ्योऽपि ग

रीयसी ॥ अपि च । नोपभोक्तुं न च त्यक्तुं शक्नोति विषयान् जरी [२]। अस्थि

निर्दशतः श्वेव जिह्वया लेढि केवलम् ॥ अथ सा लीलावती यौवनदर्पादति

हि प ९० 67

कान्तकुलमर्य्यादाकेनापि वणिक्पुत्रेण सहानुरागवती बभूव । यतः । स्वात
न्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गतिः गोष्ठी पुरुषसन्निधावनियमो वासो
विदेशे तथा [३] ॥ संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः पत्युर्वार्द्ध

कर्मार्थितं प्रवसनं नाशस्य हेतवः स्त्रियाः [९] ॥ अपरञ्च । पानं दुर्जनसंसर्गः पत्या

च विरहोऽटनम् । स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥ किञ्च । स्थानं

नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः । तेन नारद । नारीणां सतीत्वमुपजाय

हि ते ॥ अन्यच्च । न स्त्रीणामप्रिया कश्चित् प्रियो वापि न विद्यते । गावस्तृणमिवारण्ये
प ९८ प्रार्थयन्ति नवंनवम् ॥ अन्यच्च । सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् । योनिः
68 क्लिद्यति नारीणां सत्यं सत्यं हि नारद ॥ अपरच्च । घृतकुम्भसमा नारी तप्ताङ्गारसम

मः पुमान्। तस्मा घृतञ्च वह्निञ्च नैकत्र स्थापयेद् बुधः ॥ मात्रा स्वस्रा दुहित्रा

वा न विविक्तासनो भवेत्। बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥ न लज्जा

न विनीतत्वं न दाक्षिण्यं न भीरुता। प्रार्थनाभाव एवैकं सतीत्वे कारणं स्त्रियाः ॥

अपि च । पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रश्च स्थाविरे भावे न स्त्री स्वा-
तन्त्र्यमर्हति ॥ स्त्रियो हि चपला नित्यं देवानामपि विश्रुतम् । ताश्चापि रक्षिता येषां
ते नराः सुखभागिनः ॥ एकदा सा लीलावती रत्नावली किरणकर्बुरे पर्य्यङ्के तेनव

णिकपुत्रेण सह विश्रम्भालापैः सुखासीना तमलक्षितोपस्थितं पतिमवलोक्य सहसो-
त्थाय केशेष्वाकृष्य निर्भरमालिङ्ग्य चुम्बितवती । तेनावसरेण जारश्चोत्थाय पला-
यितः । उक्तञ्च । उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः । स्वभावेनैव तच्छास्त्रं स्त्री

हि
प
७०

वृद्धो स्पृशति इतम् ॥ तदालिङ्गनमवलोक्य समीपवर्तिनी कहिन्यचिन्तयत् अकस्मा-

द्वियमेनमुपगूहवतीति ततस्तया कहिन्या तत्कारणं परिज्ञाय सा लीलावती गुप्ते

न दण्डिता । अतोऽहं ब्रवीमि अकस्माद् युवती वृद्धमित्यादि । बलोपष्टम्भेन च के

नापि कारणेनात्र भवितव्यम् । इत्थं विचिन्त्य परिव्राजकेनोक्तं कारणञ्चात्र धनवा

इत्थं प्रतिभाति । यतः । धनवान् लोके सर्वः सर्वत्र सर्वदा । प्रभुत्वं धनमूले हि रा

बलवान्

ज्ञामप्युपजायते ॥ ततः खनित्रमादाय तेन विवरं खनित्वा चिरसञ्चितं मम धनं ग

हीतम् । ततः प्रभृति निजशक्तिहीनः सत्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः
सत्रासं मन्दं मन्दमुपसर्पन् चूडाकर्णेनावलोकितः ततस्तेनोक्तम् । धनेन बलवा
ल्लोको धनाद्भवति पण्डितः । पश्यैनं मूषिकं पापं स्वजातिसमतां गतम् ॥ किञ्च ।

र्थेन न विहीनस्य पुरुषस्याल्पमेधसः। क्रियाः सर्वा विनिश्यन्ति ग्रीष्मे कुसरितो

यथा ॥ अपरञ्च। यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः। यस्यार्थाः स

पुमांल्लोके यस्यार्थाः स हि पण्डितः ॥ अन्यच्च। अपुत्रस्य गृहं शून्यं सन्मित्ररहित·

हि स्य च । मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ॥ अपि च दारिद्र्यान्मरणाद्वापि दा
प रिद्र्यमवरं स्मृतम् । अल्पक्लेशेन मरणं दारिद्र्यमतिदुःसहम् ॥८॥ अन्यच्च । तानीन्द्रि
७२

72 याण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव । अर्थोष्मणा विरहि

तः पुरुषः स एव अन्यः त्यागेन भवतीति विचित्रमेतत् [२] ॥ एतत्सर्वमाकर्ण्य

मयाऽवलोकितं ममाज्ञावस्थानमशक्तं यच्चान्यस्मै एतत् वृत्तान्तकथनं तदप्यनु

चितम् । यतः । अर्थनाशं मनस्तापं गृहे दुश्चरितानि च । वञ्चनं चापमानं च म

हि

प

७३

73

तिमान्न प्रकाशयेत् ॥ तथा चोक्तम् । आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।
तपोदानापमानञ्च नव गोप्यानि यत्नतः ॥ तथा चोक्तम् । अत्यन्तविमुखे दैवे व्य
र्थयत्ने च पौरुषे । मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखम् ॥ अन्यच्च ।

मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति अपि निर्वाणमायाति नानलो
याति शीततां किञ्च कुसुमस्तबकस्येव द्वे वृत्ती तु मनस्विनः सर्वेषां मूर्ध्नि
वा तिष्ठेद्विशीर्येदथवा वने यज्ञाङ्गेव याचनया जीवने नष्टतीव गर्हितम् यतः

हि॰
प॰
७४

74

वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः
अन्यच्च दारिद्र्याद्ध्रियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो निस्तेजाः परिभूयते प
रिभवान्निर्वेदमापद्यते निर्विण्णः शुचमेति शोकनिहितो बुद्ध्या परित्यज्यते निर्बुद्धिः

तयमेतदहो नियन्ता सर्वापदामास्पदम् किञ्च वरं मौनं कार्यं न च वचन-
मुक्तं यदनृतं वरं क्लैब्यं पुंसां न च परकलत्राभिगमनम् वरं प्राणत्यागो न च पि-
शुनवाक्येष्वभिरुचि वरं भिक्षाशित्वं न च परधनास्वादनसुखम् वरं शून्या शाला

शि· ए ७५ नच त्वत्र वरो दुःखदुःसमः वरं वेश्मनि पत्नी न पुनरविनीता कुलवधूः वरं वासो
रण्ये पुनरधमानां प्रणामः अपि च सेवैव मानमखिलं ज्योत्स्नेव तमो जरेव ला
वण्यम् हरिहरकथैव दुरितं गुणशतमप्यर्थिता हरति इति विमृश्य तत किमहं पर

75

पिण्डेनात्मानं पोषयामि कष्टं भो तदपि द्वितीयं मरणद्वारम् यतः पल्लवग्राहि

पाण्डित्यं क्रयक्रीतञ्च मैथुनम् भोजनञ्च पराधीनं तिस्रः पुंसां विडम्बनाः अ

न्यच्च रोगी चिरप्रवासी परान्नभोजी परावसथशायी यज्जीवति तन्मरणं यन्म

हि॰
प॰
४४

76

दत्ते सोऽस्य विश्रामः इत्यालोच्यापि लोभात् पुनरपि तदीयान्नं गृहीतुं यत्न १

मकरवम् तथाचोक्तम् लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् तृषार्तो दुःख

माप्नोति परत्रेह च मानवः ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंश

खाटेन नाडितश्चाच्छिन्नयस्य लब्धो समन्तकेशो नियतमात्म शेषी भवति तथाव

धनलब्धो समन्तकेशो नियतमात्मा जितेन्द्रियः सर्वो पवादहस्तस्य यस्य तुष्टं न

मानसम सर्वाः सम्पतयस्तस्य सन्तुष्टं यस्य मानसम उपानद्गूढपादस्य नत्र

द्वि॰ वर्मीहनेवध्यः १ अपरश्च संतोषाम्रतनमाचो यत्र स्थावे शान्तचेतसाम् कृत

प॰

११ स्तदृशस्त्वयात्रा मितस्तेनरश्च यावतास्म किञ्च तेनापीतं कृतचेन तेन सर्वमत्र

77 ष्ठितम् येनाश्रमः दृष्टः कृता नैराश्यमवलम्बितम् अपि च अभेवितेश्वरद्वा ।

रमदृष्टिविरहृध्यथम् श्रुतकलीबवचने धन्ये कस्यापि जीवनम् यत्नः नयोजन

शते हृं बाध्यमानस्य रम्भाया सन्तप्तस्य करपात्रेऽपर्थे भवति नादरः तदस्या

वस्योचितकार्यपरिच्छेदः २ श्रेयान् उक्तञ्च को धर्मो भूतदया किं सौख्यम्

हि॰ श्रेयोगिना जगति जन्तोः कः हेतुः सद्भावः किं पारिशेष्यं परिच्छेदः ॥ तथाच
प॰
३८ परिच्छेदो हि पारिशेष्यं यदापन्नाः १ विपन्नयः अपरिच्छेदकत्वेऽपि विपदः स्युः पदे

७८

पदे तथाहि त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत ग्रामं जनपदस्यार्थे ।

आत्मार्थे पृथिवीं त्यजेत् अपरञ्च पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तर-
म् विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः इमालोच्याहं निर्जनवनमाग-
तः यतः वरं वने व्याघ्रगजेन्द्रसेविते द्रुमालयः पक्वफलाम्बुभक्षणम् तृण

हि.
प.
१५

नि शय्या परिधानवल्कले न वन्यमन्ने धनहीनजीवनम् ततोऽस्मत्सुपुण्योदयादने

न मित्रेणाहं स्नेहात्रहमात्रशत्रुहीनः अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग

एव मया प्राप्तः यतः संसारविषवृक्षस्य द्वे एव मधुरे फले काव्यामृतरसा ।

